# Parashurama Stotram

# પરશુરામસ્તોત્રમ્

## Document Information

Text title : Parashurama Stotram 2

File name : parashurAmastotram2.itx

Category : vishhnu, dashAvatAra, vAsudevAnanda-sarasvatI

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# પરશુરામસ્તોત્રમ્

કરાભ્યાં પરશું ચાપં દધાનં રેણુકાત્મજમ્ ।
જામદગ્ન્યં ભજે રામં ભાર્ગવં ક્ષત્રિયાન્તકમ્ ॥ ૧॥

નમામિ ભાર્ગવં રામં રેણુકાચિત્તનન્દનમ્ ।
મોચિતામ્બાર્તિમુત્પાતનાશનં ક્ષત્રનાશનમ્ ॥ ૨॥

ભયાર્તસ્વજનત્રાણતત્પરં ધર્મતત્પરમ્ ।
ગતગર્વપ્રિયં શૂરં જમદગ્નિસુતં મતમ્ ॥ ૩॥

વશીકૃતમહાદેવં દૃપ્તભૂપકુલાન્તકમ્ ।
તેજસ્વિનં કાર્તવીર્યનાશનં ભવનાશનમ્ ॥ ૪॥

પરશું દક્ષિણે હસ્તે વામે ચ દધતં ધનુઃ ।
રમ્યં ભૃગુકુલોત્તંસં ઘનશ્યામં મનોહરમ્ ॥ ૫॥

શુદ્ધં બુદ્ધં મહાપ્રજ્ઞામણ્ડિતં રણપણ્ડિતમ્ ।
રામં શ્રીદત્તકરુણાભાજનં વિપ્રરઞ્જનમ્ ॥ ૬॥

માર્ગણાશોષિતાબ્ધ્યંશં પાવનં ચિરજીવનમ્ ।
ય એતાનિ જપેદ્રામનામાનિ સ કૃતી ભવેત્ ॥ ૭॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીપરશુરામસ્તોત્રં સમ્પૂર્ણમ્ ।

*Parashurama Stotram*
pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*